Begins on fol. 9*a* of the MS. described under No. 411.

Incomplete.

Same work as that described under No. 12045 ante.

No. 14858. कालाग्निरुद्रोपनिषत्.
KĀLĀGNIRUDRŌPANIṢAḌ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 39*a* of the MS. described under No. 534.

Complete.

Same work as that described under No. 356 ante.

No. 14859. माण्डूक्योपनिषत्.
MĀṆḌŪKYŌPANIṢAD.

Pages, 3. Lines, 8 on a page

Begins on fol. 396 of the MS. described under No 534.

Complete.

Same work as that described under No. 694 ante.

No. 14860. दृग्दृश्यविवेकः.
DRGDRŚYAVIVĒKAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 42*b* of the MS. described under No. 534.

Incomplete.

Same work as that described under No. 4608 ante.

No 14861. अतिवर्णाश्रमिव्याख्यानम्.
ATIVARNĀŚRAMIVYĀKHYĀNAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4579.

Incomplete

A commentary on the work Ativarnāśramī which is a treatise on the duties of a peculiar ascetic order which is not bound by any hard and fast rules ordinarily enjoined to be observed by ascetics.

Beginning:

अतिवर्णाश्रमीति प्रतिज्ञातं तस्य सर्वोत्कर्षमुपपादयितुं तल्लक्षणमाह— शरीरेति । विजानाति विशेषेण जानाति साक्षात्करोतीत्यर्थः । इत्थंभूतो हि लोकसंग्रहाय वर्णाश्रमधर्मादीनाचरन्ननाचरन्वा सर्वोत्तमत्वेन गुरोर्वेत्यर्थः । तादृशस्यापि तदाचरणं संभवति ।

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ इति ॥

यो वेदान्तेति । तं त्वौपानिषदामिति श्रुतेः परतत्त्वसाक्षात्कारस्य मनन-निदिध्यासनाङ्गनिबन्धनत्वाद्वेदानधिकृतानां भाषादिमुखेन ज्ञानमपि क्रमेण वेदाधिकारप्राप्तिद्वारेणैवोपकारकमितीदं प्रागुक्तम् ।

End:

ननु वर्णाश्रमाचारा(ति)क्रमश्चेदित्थमुत्कर्षकारणे जितं पाषण्डैरित्यत आह—यस्य वर्णाश्रमेति । तत्त्वसाक्षात्कारेण विगलितदेहाद्यात्मत्वाभिमानो देहेन सहैव तद्धर्माणां वर्णाश्रमाणामतिक्रमादतिवर्णाश्रमी.

No. 14862. पञ्चीकरणम्.
PAÑCĪKARAṆAM

Pages, 2. Lines, 7 on a page.

Begins on fol. 94*a* of the MS. described under No. 4753.
Incomplete
Same work as that described under No. 4635 ante

No 14863. शरभमालामन्त्रः.
ŚARABHAMĀLĀMANTRAḤ

Pages, 6. Lines, 5 on a page

Begins on fol. 93*b* of the MS described under No. 4369.
Complete.
Similar to the work described under No. 7330 ante.

Beginning:

ओं ह्रीं वीरशरभाय उग्ररूपाय उग्रमाताय उग्रदंष्ट्राय उग्रनेत्राय दक्षध्वंसनाय नारसिंहहरणाय शतसहस्रकोटिब्रह्मकपालप्रज्व-लितचिताय

End:

आवेशय आवेशय हिङ्कारभूतप्रेतपिशाचग्रहसंहरणाय त्रिषहस्रनेत्राय ध्वजसहस्रभुजाय हुं फट् स्वाहा ॥

No. 14864. दक्षिणकालिकामन्त्रः.
DAKṢIṆAKĀLIKĀMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 97*a* of the MS. described under No. 4369.

Complete.

Similar to the work described under No. 6355 ante.

Beginning:

अस्य श्रीदक्षिणकालिकामन्त्रस्य महाकालभैरव ऋषिः, त्रिष्टुप् छन्दः, अनिरुद्धसरस्वतीश्रीदक्षिणकालिका देवता । ह्रीं बीजं, हूं शक्तिः, क्रीं कीलकं, प्रसादसिद्ध्यर्थे जपे विनियोगः.

End:

विपरीतरता तत्र कालिका हृदयोपरि ।
पेयं खाद्यं च चोष्यं च तान्दत्वा(द्या)त्तु परस्परम् ॥

ओं क्री हूं ह्रीं दक्षिणकालिके क्रीं हुं ह्रीं स्वाहा ।

अथ महाकालमन्त्र --

ओं ह्रीं क्ष्म्रीं हूं महाकालाय ह्रौ महादेवाय क्रों कालिकायै ह्रौं नमः.

No 14865 गुरुपादुकापञ्चकस्तोत्रम्.
GURUPĀDUKĀPAÑCAKASTOTRAM.

Pages, 2. Lines, 4 on a page

Begins on fol 69*a* of the MS described under No. 4369.

Complete.

Same work as that described under No. 10882 ante, but with the additional stanzas and different colophon as given below :—

श्रीसाम्बगुरुवर्याद्यां शङ्कराचार्यमध्यमाम ।
अस्मदाचार्यपर्यन्ता वन्दे गुरुपरम्पराम् ॥
पाशाङ्कुशधनुर्बाणपाणिमर्कायुतप्रभाम् ।
किंशुकाभांशुकां देवीं देशिकावलिमाश्रये ॥

* *

नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

इति गुरुपादुकां स्मृत्वा अजपां कुर्यात् ॥

No. 14866. अजपागायत्री.
AJAPĀGĀYATTRĪ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 99*b* of the MS. described under No. 4543.

Complete.

Same work as that described under No. 5852 ante, but with slight difference in the beginning and the end.

Beginning:

अस्य श्री अजपागायत्रीमन्त्रस्य हंस ऋषिः, अव्यक्तगायत्री छन्दः, परमहंसो देवता, हं बीजम्, सः शक्तिः, सोऽहं कीलकम्, मम स्वरूपस्फूर्तिप्रतिबन्धकमूलाज्ञाननिवृत्त्यर्थे जपे विनियोगः । हं सां सूर्यात्मने हृदयाय नमः । हं सीं वह्न्यात्मने शिरसे स्वाहा । हं सूं सोमात्मने शिखायै वषट्, हं सैं प्रत्यग्ज्योतिरात्मने कवचाय हुम् । हं सौं विज्ञानज्योतिरात्मने नेत्रत्रयाय वौषट् । हं सः परमात्मने अस्त्राय फट् । ध्यानम्—

अग्निष्टोमगरुद्वहयं प्रणवकं काल(बिन्दु)त्रिनेत्रोज्ज्वलं
भास्वद्रुद्रमुखं शिवाङ्घ्रियुगलं पार्श्वस्थसोमानलम् ।
उद्यद्भास्करकोटिकोटिसदृशं हंसं जगद्व्यापिनं
शब्दब्रह्ममयं हृदम्बुजपुटे ईडे सदा संस्मरे ॥

End:

आं ह्रीं क्रों यरलवशषसहों मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थतद्विषयास्सुखं चिरं तिष्ठन्तु स्वाहा । इति प्राणप्रतिष्ठामन्त्रः । अथाग्निप्रकारास्सप्त कुर्वाणाः रमिंति सप्तवारमभिमन्त्र्यात्मनस्सप्तप्रकारवेष्टनं कुर्यात् ॥

No. 14867 अन्तर्मातृकासरस्वतीमन्त्रः.
ANTARMĀTṚKĀSARASVATĪMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 103*a* of the MS. described under No. 4543

Complete.

Slightly different from the work described under No. 5872 ante, but with different Dhyānaślōkas.

Beginning:

अथ मातृकान्यासः ।

अस्यान्तर्मातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, अन्तर्मातृकासरस्वती देवता । हलो बीजानि, स्वराश्शक्तयः, मम समस्तपापक्षयार्थे अन्तश्शुद्ध्यर्थे विनियोगः ।

End:

शुद्धं बिन्दुयुतं विसर्गसहितं हृल्लेखया श्रीयुतं
बालासंपुटितं तथैव परया श्रीविद्ययालङ्कृतम् ।
आरोहादवरोहतश्च कुरुते न्यासं पुनर्हंसकं
मालिन्या दशधा विभज्य क्रमशस्स्यात्सृष्टिविध्वंसकः ॥

No 14868. शुद्धमातृकामन्त्रः.
ŚUDDHAMĀTṚKĀMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol 103*b* of the MS described under No. 4543

]Complete

Similar to the work described under No 7407 ante.

Beginning.

अस्य शुद्धमातृकामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, शुद्धमातृका देवता । हलो बीजानि, स्वराश्शक्तयः, आत्मशुद्धौ विनियोगः । अं कं ङं आं हृदि, इं चं ञं ईं शिरसि ।

End:

षं मज्जात्मने नमः । सं शुक्लात्मने नमः । हं प्राणात्मने नमः, ळं जीवात्मने नमः । क्षं परमात्मने नमः । इति व्यापयेत् ॥

No. 14869. बिन्दुमातृकामन्त्रः.
BINDUMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 104*a* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 6779 ante.

Beginning:

अस्य बिन्दुमातृकायाः ब्रह्मा ऋषिः, देवी गायत्री छन्दः, बिन्दुमातृकासरस्वती देवता । हलो बीजानि, स्वराश्शक्तयः । विनियोगः ।

End:

अं अं नमः । आं आं नमः । कं कं नमः । मं मं नमः । यं त्वगात्मने नम । क्षं परमात्मने नमः । इति व्यापयेत् ॥

No. 14870. विसर्गमातृकामन्त्रः
VISARGAMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 104*a* of the MS. described under No. 4513

Complete.

Similar to the work described under No. 7246 ante.

Beginning :

अस्या विसर्गमातृकायाः, ब्रह्मा ऋषिः, गायत्री छन्दः, मातृका देवता । हलो बीजानि, स्वराश्शक्तयः, विनियोगः, शेषं पूर्ववत् ।

End :

मः मः नमः । यः त्वगात्मने नमः । क्षः परमात्मने नमः ॥

No. 14871 हृल्लेखामातृकामन्त्रः.
HṚLLEKHĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 104*b* of the MS. described under No. 4513.

Complete.

Similar to the work described under No. 7729 ante.

Beginning and the **End** :

अस्य हृल्लेखामातृकायाः शक्तिः ऋषिः, गायत्री छन्दः, मातृका देवता, हलो बीजानि, स्वराश्शक्तयः, विनियोगः । ह्रां हृत् । ह्रीं शिरः । ह्रूं शिखायै । ह्रैं कवचं, ह्रौं नेत्रं, ह्रः अस्त्रम् । दिग्बन्धः । शेषं पूर्ववत् । ह्रीं अं नमः । ह्रीं कं नमः । ह्रीं मं नमः । ह्रीं यं त्वगात्मने नमः । ह्रीं क्षं परमात्मने नमः ॥

No 14872. कमलामातृकामन्त्रः.
KAMALĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page

Begins on fol. 104*a* of the MS. described under No 4513

Complete.

Similar to the work described under No 7435 ante.

Beginning :

अस्याः कमलामातृकायाः भृगुः ऋषिः, पङ्क्तिश्छन्दः, कमलामातृका देवता, श्रां बीजम्, श्रीं शक्तिः, श्रूं कीलकम्, विनियोगः ।

End:

श्रीं कं नमः, श्रीं मं नमः, श्रीं यं त्वगात्मने नमः । श्रीं क्षं परमात्मने नमः । इति व्यापयेत् ॥

No. **14873.** बालासंपुटितमातृकामन्त्रः.

BĀLĀSAṀPUṬITAMĀTṚKĀMANTRAḤ.

Pages, 2 Lines, 7 on a page

Begins on fol. 104*b* of the MS. described under No. 4543.

Complete.

Similar to the work described under No 6773 ante

Beginning:

अस्या बालासंपुटितमातृकायाः दक्षिणामूर्तिः ऋषिः, पङ्क्तिश्छन्दः, बाला सरस्वती देवता । हलो बीजानि, स्वराः शक्तयः, बिन्दवः कीलकम्, विनियोगः ।

End:

यं ऐं क्लीं सौः यं त्वगात्मने नमः, रं ऐं क्लीं सौः रं असृगात्मने नमः, क्षं ऐं क्लीं सौः क्षं परमात्मने नमः ॥

No. **14874.** परामातृकामन्त्रः.

PARĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No 4543.

Complete.

Similar to the work described under No. 6593 ante.

Beginning:

अस्य श्रीपरामातृकायाः ब्रह्मा ऋषिः, गायत्री छन्दः, परासरस्वती देवता, सां बीजम्, सौः शक्तिः, सूं कीलकम्, सकलेष्टार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

सौः अं नमः, सौः आं नमः, सौः कं नमः, सौः मं नमः, सौः यं त्वगात्मने नमः, सौः क्षं क्षं परमात्मने नमः ॥

No **14875.** श्रीविद्यामातृकामन्त्रः.

ŚRĪVIDYĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page

Begins on fol. 105*a* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 7271 ante

Beginning :

अस्याः श्रीविद्यामातृकायाः आनन्दभैरव ऋषिः, गायत्री छन्दः, श्रीविद्यासरस्वती देवता, ऐं कएईलह्रीं बीजम्, क्लीं हसकहलह्रीं शक्तिः, सौः सकलह्रीं कीलकम्, जपे विनियोगः ॥

End :

कएईलह्रीं हसकहलह्रीं सकलह्रीं यं त्वगात्मने नमः । कएईलह्रीं हसकहलह्रीं सकलह्रीं क्षं परमात्मने नमः ॥

No **14876.** आरोहावरोहश्रीविद्यामातृकामन्त्रः.

ĀRÔHĀVARÔHAŚRĪVIDYĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol 105*b* of the MS described under No 4543

Complete

On the ceremonial touching of certain parts of the body while repeating the Mantra-formulas relating to Goddess Śakti, along with the successive letters of the alphabet in the natural as well as in the reverse order

Beginning and the **End:**

अस्या आरोहावरोहमातृकायाः स्वच्छन्दभैरव ऋषिः, अव्यक्तगायत्री छन्दः, मातृका• देवता, हलो बीजानि, स्वराश्शक्तयः, ... विनियोगः । शेषं पूर्ववत् । अं . . . क्षं, क्षं . . . अं नमः—इति व्यापयेत् ॥

No **14877.** हंसमातृकामन्त्रः.

HAṀSAMĀTṚKĀMANTRAḤ

Page, 1. Lines, 7 on a page

Begins on fol. 105*b* of the MS described under No 4543.

Complete.

Similar to the work described under No 7649 ante

Beginning :

अस्या हंसमातृकायाः ब्रह्मा ऋषिः, देवी गायत्री छन्दः, हंसमातृकासरस्वती देवता, हं बीजं, सः शक्तिः, सोहं कीलकम्, ओङ्कारस्तात्पर्यम्, नभस्थानमुदात्तस्वरः । विनियोगः ।

End:

हंसस्सोहं क्षं परमात्मने नमः। इति व्यापयेत्। अं मध्यमाभ्यां नमः। आं अनामिकाभ्यां नमः, सौः कनिष्ठिकाभ्यां नमः,

इति करशुद्धिं कृत्वा संविदं स्वीकृत्य जपं कुर्यात्॥

No. **14878.** महात्रिपुरसुन्दरीमहामन्त्रः.

MAHĀTRIPURASUNDARĪMAHĀMANTRAḤ

Pages, 2 Lines, 7 on a page

Begins on fol. 106*a* of the MS described under No. 4543.

Complete.

Similar to the work described under No. 6890 ante.

Beginning:

अस्य श्रीमहात्रिपुरसुन्दरीमहामन्त्रस्य आनन्दभैरव ऋषिः, देवी गायत्री छन्दः, ऐं बीजम्, क्लीं शक्तिः, सौः कीलकम्, मम मोक्षार्थे जपे विनियोगः।

End:

जपान्ते च ऋषिच्छन्दोदेवताबीजशक्तिकीलककराङ्गन्यासध्यानादिकं कृत्वा दशपञ्चमुद्राः प्रदर्श्य निर्याणमुद्रया जपं समाप्य पीठपूजामारभेत्॥

No. **14879.** वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 4. Lines, 6 on a page

Begins on fol. 6*a* of the MS. described under No. 211.

Complete.

Similar to the work described under No. 3795 ante.

Beginning:

वैश्वदेवे विश्वे देवा इत्यत्र वैश्वदेवपञ्चमहायज्ञानां प्रयोगो वक्ष्यते— समाप्ते पुण्याह उपक्रमः। तेषां मन्त्राणामु . . . . मधश्शय्या ब्रह्मचर्यमष्टाङ्गं मधुमांसं मैथुनदन्तधावनाभ्यञ्जनानुलेपना . . स्रग्धारणवर्जम्। उत्तमस्यैकरात्रमुपवासः। त्रयोदशाहमेतद्व्रतम्। सपत्नीकस्य सिद्धेऽन्ने तिष्ठन् पत्न्याथ भूतमिति स्वामिने . . . . . . त्। तत्सुभूतं विराडन्नं तन्मा क्षायीति प्रतिवचनम्।

End:

तेभ्यो बलिं पुष्टिकाभो हरामि मयि पुष्टिं पुष्टिपतिर्ददातु स्वाहेति बलिहरणम्। स्नानादूर्ध्वं पञ्च महायज्ञाः कर्तव्या इत्युपदेशः।

देशान्तरे चान्यगृहे च भुङ्क्ते होमस्वधाकारबलिक्रिया च ।
एकेन चान्नेन तु लौकिकाग्नौ कुर्याद्बलिं काकगृहाङ्गणं विना ॥

No. 14880. ब्रह्मयज्ञप्रयोगः.

BRAHMAYAJÑAPRAYŌGAH.

Pages, 2. Lines, 6 on a page.

Begins on fol 8*a* of the MS described under No. 211.

Complete

Similar to the work described under No. 2848 ante

This procedure is intended for the followers of Āpastamba.

Beginning:

देशकालौ सङ्कीर्त्य माध्याह्निकसन्ध्यावन्दनानन्तरमेवंगुणेत्यादिपुण्य(शुभ)-
तिथौ देवर्षिपितृतुष्ट्यर्थं नित्यब्रह्मयज्ञेन सद्यो यक्ष्ये—विद्युदसि.

End;

नमो ब्रह्मणे—करोमि इति त्रिः पठेत् । ओं वृष्टिरसि वृश्च मे पाप्मा-
नमृतात्सत्यमुपागाम् ॥

Colophon:

इति ब्रह्मयज्ञः ॥

No. 14881. ब्रह्मयज्ञाङ्गदेवर्षिपितृतर्पणप्रयोगः.

BRAHMAYAJÑĀṄGADĒVARSIPITRTARPAṆAPRAYŌGAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol 8*b* of the MS described under No. 211

Complete.

Similar to the work described under No 2843 ante

The procedure herein laid down is intended for Telugu and Kanarese Brahmans of the Āpastamba school

Beginning:

एवङ्गुणविशेषणविशिष्टायां पुण्य(शुभ)तिथौ ब्रह्मयज्ञाङ्गदेवर्षिपितृतर्पणं
करिष्ये—

ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि, सर्वान्देवांस्तर्पयामि, सर्वान्देवगणां-
स्तर्पयामि, सर्वा देवपत्नीस्तर्पयामि ।

End:

सर्वान् पितृपौत्रान् स्वधा नमस्तर्पयामि, भूः पितॄन् स्वधा . . . मि,

भुवः पितॄन् स्वधा . . . मि, सुवः पितॄन् स्वधा . . . . मि, भूर्भुवस्सुवस्स्वधानमस्तर्पयामि ।

आदौ पिता तथा माता सपत्नी जननी तथा ।
मातामहास्सपत्नीका आत्मपत्न्यस्तथोत्तरे ॥
सुतभ्रातृपितृव्याश्च मातुलास्सहभार्यकाः ।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः ॥
पितृष्वसा मातृष्वसा श्वशुरो गुरुरिक्थिनः ।

एतेषां नित्यतर्पणं कर्तव्यम् । तीर्थश्राद्धमहालयादौ एवं . . . . . .

No. 14882. वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 2 Lines, 6 on a page

Begins on fol. 9*a* of the MS described under No. 211.

Complete.

Slightly different from the work described under No. 3793 ante.

No 14883. चतुर्वर्गचिन्तामणिः.

CATURVARGACINTĀMANIḤ.

Pages, 5 Lines, 5 on a page.

Begins on fol. 71*a* of the MS described under No 211.

A small portion of the Caturvargacintāmani, which work has been described under Nos. 2741—2756 ante.

Incomplete.

Beginning:

देवलः—

ब्राह्मणो मदलोभेन विधवां विप्रनन्दिनीम् ।
यभेत्कामातुरः पश्चात् ज्ञात्वासौ पतिवर्जिता ॥
इति मत्वा व्रजेद्गन्धमादनं पर्वतोत्तमम् ।
तत्र चापाग्रमासाद्य प्रातस्स्नानाद्दिनेदिने ॥
मासमात्रेण शुद्धिस्स्या(त्सशु)द्धोऽभून्न चान्यथा ॥

End:

क्षत्रियवैश्यपुरुषे गमने द्विगुणं प्रायश्चित्तम । क्षत्रियादीनां विप्रप्रायश्चित्तं द्विगुणम् ॥

Colophon:

इति हेमाद्रिविरचिते धर्मशास्त्रे प्रायश्चित्ताध्याये विधवागमनप्रायश्चित्तम् ॥

No **14884.** दशाहमध्ये दर्शादिश्राद्धविषयः.

DAŚĀHAMADHYĒ DARŚĀDIŚRĀDDHAVIṢAYAH.

Pages, 2. Lines, 4 on a page

Begins on fol. 74a of the MS described under No 211.

Incomplete.

Similar to the work described under No 3060 ante.

Beginning:

दशाहमध्ये दर्शः प्राप्तश्चेत्तस्मिन्नेव[सकल]श्राद्धजातं समाप्याशौचापगम एव कर्तव्यः । तत्र भविष्यत्पुराणे—

प्रवृत्ताशौचतन्त्रस्तु यदि दर्शं प्रपद्यते ।
समाप्य सोदकं पिण्डान् स्नानमात्रं समाचरेत् ॥ इति ॥

End:

तस्मात्पितृव्यतिरिक्तसपिण्डमात्रस्य दशाहमध्ये दर्श एव[सकल]श्राद्धजातं समाप्य तूष्णीमवशिष्टाशौचापगम एव कर्तव्य इति सिद्धम् ।

No. **14885.** अनाहिताग्निसंस्कारवचनानि.

ANĀHITĀGNISAṀSKĀRAVACANĀNI.

Page, 1. Lines, 4 on a page.

Begins on fol. 75*a* of the MS. described under No. 211.

Incomplete.

Similar to the work described under No. 3519 ante.

Beginning:

अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः ।
तदलाभे पलाशोत्थैः पत्रैः कार्यः पुमानपि ॥
सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना ।
असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा तु बान्धवैः ॥

End:

तथा च याज्ञवल्क्यः—

अस्थ्नामलाभे पालाशीं प्रकृतिं चापि कारयेत् ।
इति त्रिरात्रमशुचिर्भवेदिति च सपिण्डविषयम् ॥

No :4886. आशौचविषयः.
ĀŚAUCAVIṢAYAḤ.

Pages, 2. Lines 5 on a page.

Begins on fol. 75b of the MS. described under No. 211.
Incomplete
Similar to the work described under No. 14529 ante.

Beginning:

शावेऽपि तुल्यं न्यून वा शावं पूर्वेण शुध्यति ।
अधिकं तु स्वकालेन रात्रिशेषादि पूर्ववत् ॥

मृतकेऽपि पूर्वेण मृतकेन । अत्र शावेन अपरेण तुल्यं वा न्यूनं वा मध्ये प्राप्तं तथा पूर्वेण द्वितीयशुद्धिः पूर्वस्मादधिकं चेत्स्वकालेन शुध्यति । रात्रिशेषादिकं जातकवद्विज्ञेयम् ।

End:

न सूतिजं शावविशोधनं स्यान्न मातृकं पैतृकशुद्धिहेतुः ।
यत्पैतृकं मातृमृते प्रजाते तत्पैतृकस्योपरि पक्षिणी स्यात् ॥

No. 14887. सपिण्डीकरणविषयः.
SAPIṆḌĪKARAṆAVIṢAYAḤ.

Page, 1 Lines, 5 on a page

Begins on fol. 76b of the MS. described under No. 211.
Incomplete.
Similar to the work described under No. 14730 ante.

Beginning and the **End:**

अपुत्रवतामक्रममृतानां च सापिण्ड्यमेव नास्ति । तथा च स्कान्द-वचनम् ।

अक्रमेण मृतानां न सपिण्डीकृतिरिष्यते ।
यदि माता यदि पिता भर्ता नैव विधिः स्मृतः ॥ इति ।

विशेषतो ब्रह्मचारिणां तु दाहादि षोडशान्तमेव कार्यम् । न तु स-पिण्डता ।

तथोक्तं वसिष्ठेन—

सपिण्डीकरणं चैव मृतानां ब्रह्मचारिणाम् ।
दाहादिषोडशान्तं च निर्वृत्त्यैव यथाविधि ॥
द्वादशेऽहनि संप्राप्ते नैव कार्या सपिण्डता । इति ॥

No. 14888. गीतासारः.
GĪTĀSĀRAḤ.

Pages, 4. Lines, 10 on a page.

Begins on fol 22*a* of the MS. described under No 2014.

Complete.

Same work as that described under No. 14272 ante, but with slight difference in the beginning in Rsicchandō-dēvatā, etc.

Beginning:

अस्य श्रीगीतासारस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, अग्निर्वायुस्सूर्यो देवता, गायत्र्युष्णिगनुष्टुभश्छन्दांसि, आहवनीयगार्हपत्यदक्षिणाग्निस्थानानि, ऋग्यजुस्सामवेदानि, नीलपीतश्वेतवर्णानि, अकारो बीजम्, उकारश्शक्तिः, मकारः कीलकम्, प्रणवादिसम्पुटम्, श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः।

No 14889. पाण्डवगीता.
PĀNDAVAGĪTĀ.

Pages, 5. Lines, 10 on a page.

Begins on fol 32*b* of the MS. described under No. 2022.

Complete.

Same work as that described under R. No 271(*b*) of the Triennial Catalogue of the Sanskrit MSS., Vol III, Part I-A

No. 14890. उत्तरगीता.
UTTARAGĪTĀ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No 2021.

Contains one to three Adhyāyas complete.

Same work as that described under No 2372 ante, but with additional stanzas in the beginning as given below.

Beginning:

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्त्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥
यत्पादपङ्कजध्यानाल्लक्ष्मणाद्या यतीश्वराः ।
बभूवुस्तादृशं वन्दे शङ्करं षण्मतेश्वरम् ॥

No. 14891. श्रुतिगीता.
ŚRUTIGĪTĀ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 2372.

Contains 50 Ślōkas only.

Same work as that described under No. 2570 ante.

No 14892. छायापुरुषलक्षणम्.
CHĀYĀPURUṢALAKṢAṆAM.

Pages, 2 Lines, 8 on a page.

Begins on fol. 21*a* of the MS. described under No. 2372.

Complete

Similar to the work described under No. 2544 ante. This work is taken from the Haṭhapradīpikā

Beginning:

भगवन् देवदेवेश सर्वागमविशारद ।
नराणां पापिनां लोके पापनिर्मोचनं कथम् ॥
कालज्ञानं कथं वास्य सूक्ष्मोपायेन तद्वद ।
श्रुतानि साधनानीश त्वयानेकानि भूरिशः ॥
तथापि तानि मनुजैः न शक्यान्यल्पबुद्धिभिः ।
प्रायेण मनुजा लोके कलौ स्वल्पायुषो ध्रुवम् ॥
अनेकवर्षसाध्येऽस्मिन्योगाभ्यासे ष्व(त्व)शक्तयः ।

ईश्वर उवाच—

साधु देवि त्वया पृष्टं लोकानां हितकाम्यया ।
तादृशं साधकं वक्ष्ये सर्वसाधारणं लघु ॥

* * * *

स्वच्छायापुरुषं पश्येद्गगने शुद्धि(द्ध)मानसः ।
तस्यावलोकनात्सद्यः पापराशिर्विनश्यति ॥

End:

य एतच्छृणुयान्नित्यं छायापुरुषलक्षणम् ।
दीर्घायुष्यमवाप्नोति ज्ञानं चापि सुनिर्मलम् ॥

Colophon:

इति हठप्रदीपिकायां उमामहेश्वरसंवादे छायापुरुषलक्षणं सम्पूर्णम् ॥

No. 14893. वेदान्तविषयः
VĒDĀNTAVIṢAYAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 2372.
Contains the Adhyāyas one to three only.
Same work as that described under No. 4743 ante.

No. 14894. नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 2. Lines, 6 on a page

Begins on fol. 138*a* of the MS described under No. 2068.
Complete.
Same work as that described under No. 9603 ante.

No 14895. कृष्णस्तवः.
KRṢNASTAVAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 138*b* of the MS. described under No. 2068.
Similar to the work described under No. 9906 ante.

Beginning and the **End**:

वन्दे नन्दव्रजवधूबृन्दोपवनदेवताः ।
यत्पयोधरशैलेषु कृष्णः कृष्णघनायते ॥
निगमशिखरगेयं नित्यकल्याणकायं
श्रितपुरुषविधेयं श्रीधरित्रीसहायम् ।
भवुकगुणनिकायं भावुकानामुपायं
परविगलितहेयं बालकृष्णं भजेयम् ॥
चोरोऽसि नवनीतानां जारोऽसि व्रजयोषिताम् ।
ध्येयोऽसि योगिनां नित्यं जारचोर नतोऽस्म्यहम् ॥

No. 14896. कविलक्षणम्.
KAVILAKṢAṆAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 139*a* of the MS. described under No. 2068.
Incomplete.

Purports to describe the characteristics and the attainments necessary for a good poet.

Beginning:

अत्र कविप्रसङ्गादिदं बोध्यम्—

शुचिर्दक्षश्शान्तस्सुजनविनुतस्सूनृतरतः

कलावेदी विद्वान् कलमृदुपदैः काव्यरचनः ।

कृतज्ञो दैवज्ञस्सहृदय[हृ]दयस्सत्कुलभवः

शुभाकारश्छन्दोगणगुणविवेकी स हि कविः ॥

End:

शास्त्रालङ्कारसंस्कारी विवेकी कविपुङ्गवः ।

अलङ्कारैकनिष्ठो यो भूषणार्थी बुधैर्मतः ॥

No 14897. वैयासिकन्यायमालाधिकरणश्लोकानुक्रमणिका.

VAIYĀSIKANYĀYAMĀLĀDHIKARANAŚLŌKĀNUKRAMAṆIKĀ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 85*a* of the MS. described under No. 4651.

Contains one to three Pādas in the first Adhyāya.

An index of the verses contained in the Adhikaraṇas or topical subdivisions of the Vaiyāsikanyāyamālā, which work has been described under No 4751 ante.

No. 14898. अगस्त्याष्टकश्लोकानुक्रमणिका.

AGASTYĀṢṬAKAŚLŌKĀNUKRAMANIKĀ.

Page, 1. Lines, 5 on a page

Begins on fol. 86*a* of the MS. described under No. 4651.

Complete.

An index of eight stanzas contained in the Agastyāṣṭaka, which work has been described under No. 10899 ante.

No. 14899. वैयासिकन्यायमालाधिकरणश्लोकाः.

VAIYĀSIKANYĀYAMĀLĀDHIKARANAŚLŌKĀḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 87*a* of the MS described under No. 4651.

Contains the Pādas one to three only in the first Adhyāya.

Same work as that described under No. 4751 ante.

No. 14900. ऐतरेयोपनिषद्.
AITARĒYŌPANIṢAD.

Page, 1. Lines, 16 on a page

Begins on fol. 1*b* of the MS. described under No 4375

Incomplete.

Same work as that described under No 326 ante.

No. 14901. नाडीग्रन्थः.
NĀḌĪGRANTHAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 2*a* of the MS described under No 4375.

Wants the beginning and the end

Similar to the work described under No. 13813 ante.

Beginning:

एकवर्षे एकमासे अग्निभित्तिभयं ह(प)रम् ।
द्विअब्दे च द्विमासे च बालारिष्टभयं ह(प)रम् ॥
त्रिअब्दे च त्रिमासे च बालारिष्टभयं ह(प)रम ॥
चतुरब्दे चतुर्मासे मातापित्रोस्सुखं तथा ।
पञ्चाब्दे पञ्चमासे च परं तु विद्यालाभतः? ॥

End:

गमनं पुनरागम्य सेतुस्नानफलं लभेत् ।
देवतार्चनविज्ञानं सौख्यं वा सुखम् . . .? ॥

No. 14902. न्यायामृतकारिका.
NYĀYĀMṚTAKĀRIKĀ.

Pages, 4. Lines, 9 on a page.

Begins on fol 97*b* of the MS. described under No. 4796.

Incomplete.

A work in verse giving the summary of the Nyāyāmrta, which work has been described under No 4796 ante.

Beginning:

प्रणम्य चरणद्वन्द्वं मापतेर्लेखनं त्वहम् ।
कुर्वे न्यायामृतस्थानां कारिकाभिर्यथामति ॥
स्वरूपेण त्रिकालस्य निषेधो नास्ति ते मते ।
रूप्यमिथ्यात्मकत्वेन निषेधस्त्वात्मनोऽपि च ॥

ज्ञातृज्ञेयविहीनं ते ब्रह्मज्ञानात्मकं यदि ।
भोक्तृभोज्यविहीनापि भवेत्तर्हि भुजिक्रिया ॥
कालादिभिः परिच्छिन्न अग्र आसीदथामृतः ।
इत्यादियुक्तिभिर्नो चेद्द्वारा व्याप्तिर्भवेत् ॥

End:

बन्धस्य तदपायेन कृतेस्तत्फलभाक्तया ।
सामानाधिकरण्याच्च न बुद्धेः . . . . . ।
कर्मत्वकरणत्वादीनां म . . . . ।

No. **14903.** रामायणव्याख्यानम्—वाल्मीकिहृदयम्.

RĀMĀYANAVYĀKHYĀNAM VĀLMIKIHṚDAYAM.

Substance, palm-leaf. Size, 18¼ × 1½ inches. Pages, 286. Lines, 8 on a page. Character, Nandināgarī. Condition, very much injured. Appearance, old.

Begins on fol 1*a*. The other works herein are Brahmasūtrabhāsyārthatattvadīpikā 26*a*, Yamakabhāratatịkā 50*a*, Pārijātaharanaṭikā 77*b*, Prakriyākaumudī 98*a*, Mīmāṁsākaustubha 106*a*.

Contains the Bālakānda complete and the Ayōdhyākāṇḍa incomplete and in disorder.

Same work as that described under No 11889 ante

Beginning:

श्यामामध्यस्फुरन्नीलनीरदद्युतिविग्रहम् ।
सातयालिङ्गितं रामं कलयेऽभीष्टसिद्धये ॥

* * * *

तपस्स्वाध्यायेत्यादि । तपो निदिध्यासनं, ब्रह्मैतदुपास्यं तत्तपः इति श्रुतेः

* * * *

आत्रेयाहोबलकृते वाल्मीकिहृदयाह्वये ।
श्रीबालकाण्डव्याख्याने सर्गोऽयं प्रथमो गतः ॥

* * * *

End:

विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः— इति श्रुतेः ॥

No. 14904. ब्रह्मसूत्रभाष्यार्थतत्त्वदीपिका.

BRAHMASŪTRABHĀṢYĀRTHATATTVADĪPIKĀ.

Pages, 48. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under the previous number.

Contains the first Pāda of the first Adhyāya, but wants the beginning.

Similar to the commentary described under No. 4814 ante: by Kuṇḍalagiri, son of Kaudibhaṭṭa and disciple of Lakṣmīnāthapūjyapāda.

Beginning:

शोऽत इति सूत्रे भाष्यम् । द्वादशाहः क्रत्वात्मकस्सत्रात्मकश्च भवतीति लिङ्गभूयस्त्वात्ताद्धि बलीयस्तदपीति सूत्रे श्रवणगुरुप्रदानयोः प्रधानेतिकर्तव्यतास्वरूपयोः गुरुप्रदानं प्रबलमित्युपपादनार्था तत्त्वप्रकाशिका । न चेति . . . . दौर्बल्यं यागीयहिंसायामितिकर्तव्यतायामेव प्राबल्यदर्शनादिति । भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि (च) दर्शयतीति सूत्रात्तत्त्वप्रकाशिका ।

* * * *

जिज्ञासासूत्रे च प्रथमसंहिताया ओङ्कारनिर्देशं सूत्रावयवभूतमङ्गीकृत्य संहिताप्रयोजनमुत्तरसूत्रेष्वनतिसूचनं प्रतिसूत्रं ब्रह्मविद्यात्वादाद्यन्तपरो . . . . इति गम्यते । नचोह्यमानं वाक्याद्यङ्गमन्त्रेष्वप्यूह्यमानस्य मत्वानवयवत्वप्रसङ्गादिति । आनन्दमयाधिकरणे च न्यायसुधा । ज्योतिषां स्तोमो हि ज्योतिष्टोम इति ।

End:

विशिष्टज्ञानेन च त्वन्मते सर्वकर्मालेपाभावात् । एवं लिङ्गान्तरमपि दूष्यम् । एवं परमधिकरणं जीवत्वनिषेधेन ब्रह्मत्वविधानादभेदप्रतिकूलमेवेति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमाणपारावारपारीणसर्वतन्त्रस्वतन्त्रश्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्यश्रीमद्व्यासरायतीर्थश्रीमच्चरणविद्यासिंहासनाधीश्वरश्रीलक्ष्मीनाथपूज्यपादानां शिष्येण पश्चिमरङ्गराजधानीप्रधानिसोदयेराजपण्डितमान्येन कौडिभट्टोपाध्यायतनुभुवा कुण्डलिगिरिसूरिणा कृतायां श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितब्रह्मसूत्रभाष्यार्थतत्त्वदीपिकायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

No. 14905. यमकभारतटीका.
YAMAKABHĀRATAṬĪKĀ.

Pages, 54. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 14903.

Complete

Similar to the work described under No 11890 ante

Beginning:

श्रीकृष्णं रुक्मिणीसत्यासहितं पाण्डवप्रियम् ।
नत्वा श्रीपूर्णबोधार्यान् (जयतीर्थ)गुरूनपि ॥
(अन्यान्) व्याख्याकृतो नत्वा बालबोधाय सादरम् ।
व्याख्यास्यामि यथाबोधमहं यमकभारतम् ॥
बह्वर्थं पूर्णबोधार्यकृतं यमकभारतम् ।
दुर्गमार्थं मन्दधियां नानावि(चित्र)पदास्पदम् ॥
तथापि स्वल्पमेवार्थं गुरूणां करुणाबलात् ।
प्रकाशयेऽन्वयमुखं सद्भिस्तदनुमोद्यताम् ।

इह खलु संसारक्लेशसन्तप्तान (समान) सान् सज्जनानुद्दिधीर्षुः परमकारुणिकः श्रीमदानन्दतीर्थभगवत्पादाचार्यवर्यः तेषामखिलक्लेशनिवृत्तिविशिष्टपरमानन्दावाप्तये तदुपायभूतं भगवन्माहात्म्यप्रतिपादकं विचित्रपदसन्दर्भात्मकं भारतार्थसङ्ग्राहकं यमकभारतं चिकीर्षुर्निर्विघ्नपरिसमाप्त्यादिप्रयोजकत्वेन शिष्टाचारपरम्परावगतस्व . . . . न्तरायविधुरोऽपि शिष्याननुग्राहयन्नारायणस्तुतिरूपं मङ्गलं ग्रन्थतो निबध्नाति—ध्यायेदिति ।

End:

इयं पूर्वोक्ता कृष्णकथा कृष्णावतारकथा उदिता उक्ता ! वद व्यक्तायां वाचि । कर्मणि क्तः । इति नारायणनामा सुरवतीर्थपूजितः नारायणनामा । पूर्णगुणैरधिकपूर्णज्ञानेच्छाभक्तिभिस्त्वधिकपूर्णः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृतश्रीयमकभारतव्याख्यानं संपूर्णम् ॥

No. 14906 पारिजातहरणटीका.
PĀRIJĀTAHARAṆAṬĪKĀ.

Pages, 42. Lines, 6 on a page.

Begins on fol. 77*b* of the MS. described under No. 14903.

Complete.

Same commentary as that described under No. 11860 ante.

No. 14907. प्रक्रियाकौमुदी.

PRAKRIYĀKAUMUDĪ.

Pages, 56. Lines, 6 on a page.

Begins on fol 98*a* of the MS described under No. 14903.

Breaks off in the Śabdādhikāra

Same work as that described under No. 1357 ante.

No. 14908. मीमांसाकौस्तुभः.

MĪMĀṀSĀKAUSTUBHAḤ.

Pages, 36. Lines, 6 on a page.

Begins on fol 126*a* of the MS. described under No. 14903.

Contains the third Pāda of the third Adhyāya complete, and fourth Pāda incomplete.

Same work as that described under No. 4446 ante and R. No 1224 of the Triennial Catalogue of the Sanskrit MSS., Vol II, Part I-A.

No. 14909. कृष्णयजुर्वेदसंहिताभाष्यम्.

KṚṢṆAYAJURVĒDASAṀHITĀBHĀṢYAM

Pages, 4. Lines, 8 on a page.

Begins on fol 188*a* of the MS. described under No. 110

Contains the first Praśna of the second Kāṇḍa incomplete

Same work as that described under No. 97 ante.

No. 14910. नवग्रहमङ्गलाष्टकम्.

NAVAGRAHAMAṄGALĀṢṬAKAM

Pages, 3. Lines, 6 on a page

Begins on fol. 230*a* of the MS. described under No 4842

Wants the beginning ; otherwise complete.

Same work as that described under No 9529 ante.

No. 14911. दशावतारमङ्गलाष्टकम्.

DAŚĀVATĀRAMAṄGALĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 231*b* of the MS. described under No. 4842.

Contains six stanzas only.

Eight eulogistic stanzas exhorting the ten incarnations of God Viṣṇu to confer prosperity on the supplicant

Beginning:

आदावम्बुजसंभवादिविनुतः शान्तोऽच्युतश्शाश्वतः
उत्फुल्लामलपुण्डरीकनयनः पुण्यः पुराणः पुमान् ।
लोकेशः श्रुतिचोदितो मुरहरो मत्स्यावतारो हरिः
श्रीमत्सिंहगिरीश्वरः करुणया दद्यात्सदा मङ्गलम् ॥

End:

सद्यः खण्डितराजमङ्गलशरीरोद्भूतरक्तापगा-
सन्तर्पी पितृपैतृकः पितृवचो बालस्तपोनिष्ठितः ।
वेदज्ञो जमदग्निजः परशुभृद्रामावतारो हरिः
श्रीमत्सिंहगिरीश्वरः करुणया दद्यात्सदा मङ्गलम् ॥

No. 14912. ऋग्वेदसंहिता.
ṚGVĒDASAṀHITĀ.

Pages, 34. Lines, 10 on a page.

Begins on fol. 37*a* of the MS described under No. 4814.

Wants the beginning in the first Adhyāya of the first Aṣṭaka and second Adhyāya incomplete

Same work as that described under No. 1 ante.

No. 14913. मीमांसाविषयः.
MĪMĀṀSĀVIṢAYAḤ.

Pages, 12 Lines, 9 on a page. Character, Telugu.

Begins on fol. 8*a* of the MS described under No 4916.

Wants the beginning and the end.

Similar to the work described under No. 4464 ante.

Beginning:

हविष एव चतुरवदानमुपांशुयाजी आज्ये तूपस्तरणादभावेन तस्संख्यासंपत्त्यभावात् । आज्ये देवी चतुरवदेयम् । वस्तुतस्तु . . . . विधिनैव चतुर्ग्रहणप्राप्तिरित्याहुः । पुरोडाशाभ्यामित्यादिक्तानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्दैश्यस्तो[ता]मवदिति ।

End:

अमृताहुतिमेवैनां करोतीत्युपस्तरणाभिघारणयोश्च हविरमृ . . सार्थं शर्करेकघृता तस्माद्वा पुरोडाशायामप्युपांशुयाजी स्यादिति सर्वमनवद्यम् ।

No. **14914.** श्वेतार्ककल्पः.

ŚVETĀRKAKALPAH.

Pages, 4. Lines, 18 on a page.

Begins on fol 172*a* of the MS. described under No. 5593.

Complete.

On the process of preparing a useful medicine from the white Arka plant called Calatropis Gigantea.

Beginning:

पार्वत्युवाच—

नमस्ते योगिसंसेव्य योगारूढ नमो नमः ।
अधुना मालिकायोगं वद मे करुणाकर ॥

ईश्वर उवाच—

श्वेतार्ककल्पमनघे वक्ष्येऽहं तव सुव्रते ।
गोपयेत्सर्वदा देवि गुप्तात्सिद्धिमवाप्नुयात् ॥
हस्तायामर्कवारे तु नक्ति(क्तं) पूर्वदिनेऽर्चिते ।
प्रातरुत्थाय देवेशि सौरमन्त्रं जपेत्ततः ॥
सहस्रं [वा] त्रिसहस्रं वा बलिपूर्वं सुबुद्धिमान् ।
समूलं संग्रहेत्सम्यक् छायाशुष्कं तु कारयेत् ॥
छायाशुष्कं तु कृत्वा तु सूक्ष्मचूर्णं तु कारयेत् ।
तच्चूर्णं शोधयेत्सम्यक् वस्त्रेणैव सुबुद्धिमान् ॥
मन्त्रयेच्च सहस्रैकं स्पृष्ट्वा तच्चूर्णमेव च ।
सङ्ग्रहे नूतनं भाण्डं देवतार्चनपूर्वकम् ॥
पुनरेकादिने देवि चन्द्रताराानुकूलके ।
भक्षयेन्मधुना सार्धं बिडालपदमात्रकम् ॥

End:

रात्रौ तु ध्यानं कृत्वा तु साधयेत्साधकोत्तमः ।
एवं कृत्वा भवेत्सिद्धिर्नान्यथा निष्फलं भवेत् ॥

एतद्योगं कुलेशानि लभेद्भाग्यवशान्नृणाम् ।
गोपनं कुरु देवेशि न वक्तव्यं कदाचन ॥

Colophon:

इति श्रीयोगसारागमे सिद्धजीवनतन्त्रे पञ्चमः पटलः ॥

No. 14915. गोपालपूजाविधिः.
GOPĀLAPŪJĀVIDHIḤ.

Pages, 5. Lines, 16 on a page

Begins on fol. 7*a* of the MS. described under No. 424.

Complete.

Similar to the work described under R. No 3067 of the Triennial Catalogue of the Sanskrit MSS , Vol. IV, Part I-A.

Beginning:

श्रीशः (प्रदे)यान्मुकुन्दो मनस्यानन्दकन्दलम् ।
इन्दिराकुचशैलाग्रमीलदानीलनीरदः ॥

मूलमन्त्रेण त्रिषट्द्वादशावृत्त्या रेचकपूरककुम्भकैः क्रमेण प्राणानायम्य, देवं विभाव्य, मण्डूकाय नमः, कालाग्निरुद्राय नमः, आधारशक्तये नमः, प्रकृत्यै कूर्मायानन्ताय, पृथिव्यै, क्षीरसिन्धवे श्वेतद्वीपाय, मणिमण्टपाय, कल्पवृक्षाय, रत्नपीठाय नमः

* * * *

ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय, सर्वात्मसंयोगयोगपीठात्मने नमः इति पुष्पाञ्जलिं दद्यात् ।

End:

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽहमिति मां मत्वा क्षमस्व पुरुषोत्तम ॥
इत्युपसंहारमुद्रया पूजामुपसंहरेदिति मङ्गलम् ॥

Colophon:

इति गोपालपूजाविधिः ॥

No 14916. श्रीचक्रावलिस्तोत्रम्.
ŚRĪCAKRĀVALISTŌTRAM.

Pages, 8. Lines, 16 on a page

Begins on fol. 156 of the MS. described under No. 424.

Complete.

Similar to the work described under No 5732 ante

Beginning:

पाशिनि पाशच्छेदिन्यङ्कुशिनि निरङ्कुशप्रभे ललिते ।
चापिनि चापलरहिते बाणिनि बाणारिसेविते जीयात् ॥
ब्रह्मबिलोदितनिर्मलसहस्रपत्राब्जकर्णिकान्तःस्था(स्थे) ।
हंसमयरत्नपीठे रक्तं शुक्लं गुरोः पदं वन्दे ॥
तस्य परितो निविष्टान्यमितामृतपुञ्जतर्पितजगन्ति ।
विमृशामि मनसि नियतं वीरावधिपादुकासहस्राणि ॥

End:

श्रीनगर(वर)गतानां शक्तीनामेकनायका च स्यात् ।
श्रीललिता परमेशि संविंत्सिहासनैकसाम्राज्ञि ।
इत्थं महाचक्रपुरस्थदेवताचक्रावलिस्तोत्रमशेषसिद्धिदम् ।
प्रातः पठन्तः प्रभवन्ति साधकाः सर्वेषु साध्येषु फलेष्वखण्डिताः॥

Colophon:

इति श्रीचक्रावलिस्तोत्रम् ॥

No. 14917. सौभाग्यहृदयस्तोत्रम्.
SAUBHĀGYAHṚDAYASTŌTRAM.

Pages, 4 Lines, 16 on a page

Begins on fol. 41*b* of the MS. described under No 424.

Complete.

A hymn in praise of Śakti, the repetition of which is considered to be efficacious in removing all sins and diseases of the devotee: by Śivānandayōgi.

Beginning:

विचिनोमि महापूजां विमर्शो यातिदुर्लभः ।
स्वातन्त्र्यभावितशेषतत्त्वव्रातस्वरूपिणि ॥
भीरताकारतामा(मात)स्ते नमस्त्रिपुरसुन्दरि ।
कामेश्वर्यादिचित्रान्तविचित्रतनुमध्यमे ॥

महादेवमहाभागे नमस्त्रिपुरसुन्दरि ।
शिलादिगुरुहृत्पद्मसहस्रकिरणप्रभे ॥

End:

सौभाग्यहृदयं गुह्यं शिवानन्देन योगिना ।
समाराधनभूत्यर्थं स्मृतं सकलकामदम् ॥

इति विरचितमेतत्त्रैपुरस्तोत्रमाद्यं प्रकटितपरमार्थं योगिवर्योपयि(दि)ष्टम् ।
सकलदुरितरोगध्वंसन . . न कार्यं प्रतियजनविधानं सेव्यतां भक्तियुक्तैः॥

Colophon:

इति सौभाग्यहृदयस्तोत्रं संपूर्णम् ॥

No 14918. पक्षिराजसालुवतन्त्रम्.
PAKṢIRĀJASĀLUVATANTRAM.

Pages, 10. Lines, 16 on a page.

Begins on fol. 84*a* of the MS. described under No 424.
Complete, as found in the second Paṭala of the Vātūlāgama.
Slightly different from the work described under No. 8098 ante.

Beginning:

शृण्वन्तु ऋषयस्सर्वे सालुवस्य महात्मनः ।
तस्य दर्शनमात्रेण पलायन्ते च शत्रवः ॥
जापकस्य विशेषेण दर्शनात्तस्य शत्रवः ।
पादौ प्रणम्य शिरसा दासोऽहमिति भाषितम् ॥
पूजाप्रकारं मे ब्रूहि देवदेवमुमापतिम् ।
ओं आधारशक्त्यै नमः । कूर्माय नमः । अनन्ताय नमः

* * * *

एवमालिख्य यन्त्रे च तालपत्रे प्रयत्नतः ।
स्नुहिक्षीरं जले क्षिप्त्वा यन्त्रं पत्रं च निक्षिपेत् ॥
चुल्ल्योपरि घटं स्थाप्य क्वाथयेत सर्वशत्रवः ।
गृहं त्यक्त्वा पलायन्ते प्रसादात्सालुवस्य च ॥
साधकस्सर्वमाप्नोति रिपुर्देशेचरो भवेत् ।
सालुवं पक्षिराजानं यो ध्यात्वा लोकपूजितः ॥

End :

मूलेन राजवृक्षस्य समिद्धोमो विधीयते ।
अष्टोत्तरसहस्रं च शतमष्टोत्तरं तु वै ॥
हुनेच्च विधिवद्यन्त्रं कुण्डे यन्त्रं विलिख्य च ।
त्रिदिनान्ते च विद्वेषं शत्रूणां च परस्परम् ॥

Colophon:

इति वातूलाख्ये दिव्यागमे ब्रह्माणं प्रति उमामहेश्वरसंवादे पक्षिराजसालुवतन्त्रे प्रतिपक्षसङ्कदर्श(ल)ने द्वितीयः पटल. ॥

No. 14919. पञ्चाक्षरीमन्त्रन्यासः.
PAÑCĀKSARĪMANTRANYĀSAH.

Pages, 11 Lines, 16 on a page.

Begins on fol 93*b* of the MS. described under No. 424.

Incomplete.

On the ceremonial touching of certain specified parts of the body while repeating at the same time the letters of five-syllabled prayer-formula relating to God Śiva.

Beginning :

अस्य श्रीपञ्चाक्षरीमन्त्रस्य वामदेव ऋषिः, पङ्क्तिः छन्दः, श्रीसदाशिवो देवता । ओं नमिति बीजम्, मेति शक्तिः, ब्रह्मबीजमित्यादि परमेश्वरप्रीत्यर्थे विनियोगः, श्रीपञ्चाक्षरीमन्त्रे प्रथम(न)कारस्य गौतम ऋषिः, गायत्री छन्दः, इन्द्रो देवता, पीतवर्ण उदात्तस्वरः । द्वितीयवर्णस्य मकारस्य ओं अनु प् छन्दः, रुद्रो देवता, कृष्णवर्णः, स्वरितस्वरः ।

End :

इत्युक्तयावकुण्ठ(न)मुद्रया शीर्षादिपादाङ्गुष्ठपर्यन्तमवकुण्ठनं कृत्वा, मूलमन्त्रमुच्चार्य, सर्वात्मन् भगवन्नमृताप्लुतो भवेति पूर्वोक्तधेनुमुद्रां शीर्षोपरि दर्शयन् तत्स्रुताः अमृतधाराः सर्वाङ्गान्याप्लावयन्ति? रीतीर्भावयन्नमृतीकरणं कृत्वा.

No. 14920. राजराजेश्वरीयोगनिर्णयः.
RĀJARĀJĒŚVARĪYŌGANIRṆAYAḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 153*a* of the MS. described under No. 424.

Complete.

A Yōgic treatise giving a brief description of the subtle form of Brahman, as abiding in the eyes

Beginning:

ईश्वर उवाच—

चक्षुर्मध्ये स्थितं गुह्यमङ्गुष्ठे पर्वमात्रकम् ।
तदर्धं चापि पर्वार्धं तस्याग्रे सूक्ष्मकं ध्रुवम् ॥
गुह्याद्गुह्यतमं गुह्यं चक्षुस्स्थानेषु तिष्ठति ।
तन्मूर्तिर्लक्ष्यते दृश्यमापादतलमस्तकम् ॥
अचलं निर्मलं शान्तं कायस्थं तेज उच्यते ।
अमलं निर्मलं देवं शून्यं व्यापि निरञ्जनम् ॥

End:

काली(शी)पुरनिवासस्थो विश्वनाथो जगद्गुरुः ।
देहान्ते चोपदिश्येत दक्षिणे कर्णसंपुटे ॥
राजराजेश्वरं योगं शेषमार्गः प्रशस्यते ।
यः पठेत्सततं भक्त्या स मुक्तो नात्र संशयः ॥

Colophon:

इति श्रीमद्गुरुप्रसादे राजराजेश्वरयोगं संपूर्णम् ॥

No. **14921.** शरभकालीसाळुवपक्षिराजमालामन्त्रः.

ŚARABHAKĀLĪSĀLUVAPAKṢIRĀJAMĀLĀMANTRAḤ.

Page, 1. Lines, 16 on a page.

Begins on fol 205*b* of the MS described under No. 424.

Complete.

Similar to the work described under No. 7325 ante

Beginning:

ओं शरभकाल्यै नमः ओं आं एहि एहि शरभसाल्वाय स्फुर स्फुर पक्षिराजाय प्रस्फुर प्रस्फुर ह्रीं खे खे बडबानलसाल्वाय ज्वल ज्वल पक्षिराजाय ।

End:

खे खे रक्तं पिब शीघ्रं कृत्रिमान् खादय हुं फट् स्वाहा ॥

No. **14922.** शरभसाळुवपक्षिराजमालामन्त्रः.

ŚARABHASĀLUVAPAKṢIRĀJAMĀLĀMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 205*b* of the MS. described under No. 424.

Complete.

Similar to the work described under No. 7341 ante.

Beginning:

ओं प्रलयकालवीरशरभाय नमः । ओं नमो भगवते अषां रवि(वीर)-शरभाय अनन्तसूच्य(र्य)प्रकाशाय नारसिंहक्रोधनाशनाय ।

End:

आवेशयावेशय फट् फट् मारय मारय सर्वग्रहानुच्चाटयोच्चाटय हूं हूं फट् स्वाहा ॥

No. 14923. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 9. Lines, 16 on a page.

Begins on fol. 212*b* of the MS described under No 421.

Contains the second Adhyāya of Rahasyajīvatantra.

Same work as that described under No 5603 ante.

No. 14924. वेदान्तविषयकारिकाः.

VEDĀNTAVISAYAKĀRIKĀḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 234*b* of the MS described under No 424.

Wants the beginning and the end.

Similar to the work described under No 4743 ante.

Beginning:

ब्रह्मा ब्रह्म वसिष्ठश्च शक्तिश्चैव पराशरः ।
व्यासः शुको गौडपदो गोविन्दस्वामिशङ्कराः ॥
शङ्कराचार्यशिष्यास्तु चत्वारो लोकविश्रुताः ।
पद्मपादः सुरेशश्च हस्तामलकत्रोटकाः ॥
तीर्थाश्रमौ पद्मपादशिष्यौ द्वौ च सरस्वती ।
पुरी च भारती चैव सुरेशश्चा(स्या)नुयायिनौ ॥

* * * *

अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतस्सिद्धं सच्चिदानन्दलक्षणम् ॥

काके शौचं द्यूतकार्येषु सत्यं क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता ।
सर्पे शान्तिः स्त्रीषु कामोपशान्ती राजा मित्रं केन दृष्टं श्रुतं वा ॥

End :

ईश्वरे हृदधी(हितदी)नेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षाः यः करोति स मध्यमः ॥
अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥

No. 14925. तैत्तिरीयोपनिषद्भाष्यव्याख्या—दीपिका.

TAITTIRĪYŌPANIṢADBHĀṢYAVYĀKHYĀ : DĪPIKĀ.

Pages, 16. Lines, 16 on a page.

Begins on fol 240*a* of the MS. described under No. 424.

Contains the Brahmavallī and Bhṛguvallī complete, but wants the beginning.

A commentary on the Taittirīyōpanisadbhāsya of Śaṅkarācārya, which work has been described under No. 505 ante

Beginning

नचैतदचेतनं कारणं कामयितृत्वात् । न च कामादिना विकारित्वं कामानामपि स्वरूपाभिन्नत्वेन विशुद्धत्वात् । स आत्मा यस्मादाकाशः संभूतः अकामयत कामितवान् कथं बहुः प्रभूतः स्यां भवेयम् । कथमेकस्यार्थान्तराननुप्रवेशे बहुत्वं स्यादत आह—प्रजायेयेति । उत्पद्येय नहि पुत्रोत्पत्त्यैवार्थान्तरविषयं बहुभवनं कथं तर्ह्यात्मस्थानाभिव्यक्तनामरूपाभिव्यक्त्या, यदात्मस्थेऽनभिव्यक्ते नामरूपे व्याक्रियेते ।

* * * *

Colophon :

ब्रह्मवल्ली समाप्तम्(प्ता) ॥

समाप्ता ब्रह्मविद्या तत्साधनं तपो वक्तव्यमन्नादिविषयाणि चोपासनानीत्युत्तरो ग्रन्थः । आख्यायिका विद्यास्तुतये ।

End.

सूर्यश्च ज्योतिः स्वप्रकाशोऽस्मि । सकृद्विभातमस्मदीयं ज्योतिरित्यर्थः । य एवं वेद तस्यैवं यथोक्तं फलमिति शेषः । इति वल्लीद्वयमुपनिषद्रहस्यज्ञानम् ।

नारायणेन रचिता शङ्करोक्त्युपजीविना ।
अस्पष्टपदवाक्यानां वल्लीत्रितयदीपिका ॥

No. **14926.** बालामालामन्त्रः.
BĀLĀMĀLĀMANTRAḤ

Pages, 2. Lines, 16 on a page

Begins on fol 261*b* of the MS. described under No. 424.

Complete

Similar to the work described under No 6772 ante.

Beginning :

अस्य श्रीबालामालामहामन्त्रस्य दक्षिणामूर्तिः ऋषिः, गायत्री छन्दः, बाला-परमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः । मूलेन न्यासः ।

End :

सर्वमृत्युनिवारिणि सर्वदारिद्यनाशिनि सर्वजनरञ्जिनि ओं बाले जगन्मो-हिनि जगद्दंशिनि जगद्रक्षिणि जगदानन्दे ओं नमो भगवति बालापरमे-श्वरि नमस्ते नमस्ते स्वाहा ॥

No **14927.** बालापरमेश्वरीमालामन्त्रः.
BĀLĀPARAMĒŚVARĪMĀLĀMANTRAH.

Pages, 3. Lines, 16 on a page.

Begins on fol. 262*a* of the MS. described under No 424.

Complete.

Same work as that described under No. 6770 ante, but slightly different in the beginning

Beginning :

अस्य श्रीआदिशक्तिमालामहामन्त्रस्य दक्षिणामूर्तिः ऋषिः, गायत्री छन्दः । श्रीबालापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ओं आयी आनन्दवल्ली अमृतकरतली आदिशक्तिः परायी
मायी मायास्वरूपी स्फटिकमणिमयी मामतङ्गी षडङ्गी ।
ज्ञानी ज्ञानार्थसिद्धी ललितपरिमली नादओङ्कारमूर्ति-
र्योगी योगासनस्था भुवनवशकरी सुन्दरी ओं नमस्ते ॥

No 14928. धर्मशास्त्रवचनानि.

DHARMAŚĀSTRAVACANĀNI.

Pages, 2. Lines, 16 on a page.

Begins on fol. 275*a* of the MS described under No. 424.

Incomplete.

Six stanzas taken from various texts stating that a bachelor, widow or a widower is not fit for the repetition of certain Mantras, etc.

Beginning:

स्मृतिसंग्रहे—

दन्तधावनताम्बूलं क्षौराभ्यङ्गं परान्नभुक् ।
वर्जयेन्मन्त्रसिद्धिस्स्यात्फलप्राप्तिर्न संशयः ॥

सुमन्तुः—

पतिहीनस्तु(ना तु) या नारि पत्नीहीनस्तु यो नरः ।
वर्जयेत्सर्वकार्येषु तत्सर्ज्यं(र्वै) दग्धकाष्ठवत् ॥

End:

तज्जपं निष्फलं तस्य कर्ताचार्यः कुलक्षयः? ।
सिद्धचक्रं न जानाति सङ्कल्पादौ मूर्तिं वदेत् ॥

No. 14929. कामकलापूजाविधिः.

KĀMAKALĀPŪJĀVIDHIH

Pages, 2. Lines, 16 on a page.

Begins on fol. 278*a* of the MS. described under No. 424.

Incomplete.

Deals with the manner of conducting the worship of the goddess Kāmakalā who is a manifestation of Śakti.

Beginning:

सर्वे प्रसिद्धिमायान्ति क्रोधदोषादिवर्जिताः ।
स्मरणादेव जायन्ते त्रैलोक्योत्पादनक्षमाः ॥

अं सुधाकलायै नमः, आं प्रीतिकलायै नमः, इं रतिकलायै नमः, ईं धृतिकलायै नमः, उं कीर्तिकलायै नमः, ऊं मनोहरकलायै नमः ।

End:

विसर्जनं पिबेत्सिद्धिः पुनः पात्रं पिबेत्सुखम् ।
रजस्वलामहास्तोत्रं पठते प्रत्यहं सदा ॥

सर्वशाक्तमहामन्त्रं तिलक . . . स्तवम् ।
एतत्पर इत्यादि.

No. 14930. कामरत्नम्.
KĀMARATNAM.

Substance, paper. Size, 11 × 7½ inches. Pages, 100 Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the 14th Upadēśa.

Begins on fol 1*a* The other work herein is Abhidhānacūdāmani 51*a*.

Foll 1—2 contain the index of this work.

Similar to the work described under No 3888 ante. By Śrīnātha.

Deals with the following subjects —

१. वशीकरणम्.
२. आकर्षणम्.
३. विजयादिव्याघ्रनिवारणम्.
४. स्तम्भनम्.
५. केशादिरञ्जनम्.
६. वीर्यवर्धनम्.
७. गाढीकरणलोमशातनादि.
८. दृढीकरणकलहकरणादि.
९. अरिष्टनाशनादिसस्योपद्रवनाशनगोमहिष्यादिदुग्धवर्धनम्.
१०. उच्चाटनादिव्याधिकरणम्.
११. नानाकौतुकम्.
१२. कामसिद्ध्याद्यनावृष्टिनिवारणम्.
१३. निधिदर्शनाञ्जनादिमृत्युसंजीविनी.
१४. विषनिवारणम्.

Beginning

यस्येश्वरस्य विमलं चरणारविन्दं संसेव्यतो विबुधसिद्धमधुव्रतेन ।
निर्वाणसूचकगुणाष्टकवर्णपूर्णं तं शङ्करं सकलदुःखहरं नमामि ।

कामरत्नमिदं चित्रं नानातन्त्रार्णवान्मया ।
वश्यादियक्षिणीमन्त्रसाधनान्तं समुद्धृतम् ॥

वश्याकर्षणकर्माणि वसन्ते योजयेत्प्रिये ।
ग्रीष्मे विद्वेषणं कुर्यात्प्रावृषि स्तम्भनं तथा ॥
शिशिरे मारणं चैव शान्तिकं शरदि स्मृतम् ।
हेमन्ते पौष्टिकं कुर्यात्कृतकर्मविशारदः ॥
*   *   *   *

अथ वश्यादिकर्मणामृतु(णां तिथि)निर्णयः—

वशीकरणकर्माणि दशम्यां धारयेद्बुधः ।
तृतीयायां त्रयोदश्यान्तथाकर्षणकर्म वै ॥
उच्चाटनं द्वितीयायां षष्ठ्यां चैव प्रकारयेत् ।
द्वादश्यां मारणं शस्तमेकादश्यां तथैव च ॥
पञ्चम्यां पौर्णमास्यां च यो जपेच्छक्तिकादिकम् ।
सर्वविद्याप्रसिद्ध्यर्थं तिथयः कथिताः क्रमात् ॥

इति विधितिथिनिर्णयः ।

*   *   *   *

Colophon:

इति श्रीनाथविरचिते कामरत्ने वशीकरणं नाम प्रथमोपदेशः ॥

End:

उक्तयोगानामयमेव मन्त्रः । इति मृत्युसंजीवनी ॥

Colophon:

इति श्रीनाथविरचिते कामरत्ने निधिदर्शनाञ्जनादिमृत्युसंजीवनी नाम त्रयोदश उपदेशः ॥

अथ विषनिवारणम्—

शम्भुनोक्तं समासेन विषं स्थावरजङ्गमम् ।
कृत्रिमं स्थावरं चैव वृश्चिकाद्यं च सत्त्वजम् ॥
क्रमाल्लक्षणमेतेषां मन्त्रमुक्तं वदाम्यहम् ।
नाम वक्ष्ये विषाणां च शम्भुना कीर्तितं पुरा ॥

*   *   *   *

ओं नमो भगवती स्वच्छन्दभैरवी कालकूटविष स्फोटय अवतारयावतारय नास्ति विषहलाहलविषकृत्रिमविषसंसो(यो)गविषत्यु(मृ)त्युविषस्थावरविषजङ्गमविषकालचुचु(न्दरी)यापरादष्टमन्त्ररूप्येन अध(र)य अध(र)य ! ॥

No. 14931. अभिधानचूडामणिः.

ABHIDHĀNACŪḌĀMAṆIḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 51*a* of the MS. described under the previous number.

Incomplete.

Same work as that described under No. 13254 ante.

No. 14932. सौन्दर्यलहरी, आन्ध्रटीकासहिता.

SAUNDARYALAHARĪ WITH TELUGU MEANING.

Substance, paper. Size, $8\frac{7}{8} \times 7\frac{1}{4}$ inches. Pages, 46. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete

Same work as that described under No. 48 of M. Seshagiri Sastri's Report on a search for Sanskrit and Tamil MSS, No 2, and R. No. 946*b* of the Triennial Catalogue of MSS., Vol. II, Part I-A.

No. 14933. ख्रिष्टुगीता.

KHRIṢṬUGĪTĀ.

Pages, 122. Lines, 17 on a page.

Begins on fol. 306*b* of the MS. described under No. 1782

Complete in 14 Adhyāyas.

This work deals with the creation of the universe according to the Holy Bible and with the events and incidents that took place prior to and after the birth of Jesus Christ

Contains the following subjects :—

१. शब्दावतारः.
२. धन्यनमस्कारः.
३. महामोहन्निजन्मोपाख्यानम्.
४. पैतृकसंवित्कथनम्.
५. दाविद्वंशकथनम्.
६. कुमारीप्रसवनम्.
७. यिम्मनूयेलप्रतिष्ठा.
८. लोकनायकनक्षत्रादयः.
९. दाविद्राजविद्रावणम्.
१०. राज्याधिकारः.
११. शास्त्रोपाख्यानम्.
१२. प्रभुयात्राकथनम्.
१३. पर्ववर्णनम्.
१४. ईशपुत्रस्तोत्रम्.

Beginning :

पित्रे पुत्राय च सदात्मने नमः—शिष्य उवाच—

भूमण्डलस्थास्सकला मनुष्या मज्जन्ति पापाब्धितरङ्गमध्ये ।
जीवन्ति ते केन गुरो वदस्व तन्मां दयालो कृपया विमूढम् ॥
पृष्टा मयैवान्यबुधास्समस्ताः परस्परं भिन्नमतास्त एव ।
नानोपदेशं कथयन्ति तस्मात्तेषां मते नास्ति रुचिर्मदीया ॥
मद्भाग्यतस्त्वं समुपस्थितो हि यथार्थशास्त्रार्थपथानुयायी ।
दयां विधायाथ वदस्व मह्यमाराधनात्कस्य भवेद्धिमुक्तिः ॥

गुरुरुवाच—

साधु पृष्टं त्वया शिष्य धर्ममार्गानुसारिणा ।
इदानीं त्वां प्रवक्ष्यामि परित्राणपथं नृणाम् ॥
खृष्टाराधनतो मुक्तिस्तत्तु विश्वासरूपकम् ।
ईशे चैवेशपुत्रे चाभेदो विश्वास उच्यते ॥

* * * *

गुरुरुवाच—

अथ वक्ष्ये तव स्नेहाद्यत्सर्वं पृष्टमुत्तमम् ।
शृण्वनन्यमना भूत्वा गदतो विस्तरान्मम ॥
आदौ बभूव शब्दस्स चैशेन परात्मना ।
सहासीन्न पृथक् सोऽपि स्वयमीशो न संशयः ॥
ईश्वरीयगुणास्सर्वे यस्मात्तत्र व्यवस्थिताः ।
अतस्तशब्द एवेशो भेदलेशो न विद्यते ॥

* * * *

Colophon :

इति श्रीख्रिष्टुगीतायां येशूत्पत्तिपर्वणि शान्तयोहन्निराचितमङ्गलसमाचारस्य प्रथमसर्गादुद्धृतः शब्दावतारो नाम प्रथमोऽध्यायः ॥

End :

साह्यं समेतान्यपि शत्रुमुक्त्या तं स्वर्गसैन्यैस्सह संस्तवानि ।
अत्यूर्ध्वलोकेषु महेशकीर्तिः कौशल्यमुर्व्यां सुनृषु प्रसादः ॥
इति प्रगीतं त्रिजगत्सु सर्वे येशूद्भवादस्तु सदापि भूतेः ॥

Colophon:

इति श्रीख्रिष्टुसङ्गीतायां येशूत्पत्तिपर्वणीश्वरपुत्रस्तोत्रं नाम चतुर्दशोऽध्यायः ॥

समाप्तं चेदं षष्ठ्यूनसहस्रश्लोकात्मकं येशूत्पत्तिनामकं प्रथमं पर्व ॥

No. 14934. ख्रिष्टुगीता.

KHRISTUGĪTĀ.

